# Shri Ranganathamangalam

# શ્રીરઙ્ગનાથમઙ્ગલમ્

## Document Information

Text title : Ranganathamangalam

File name : ranganAthamangalam.itx

Category : vishhnu, mangala

Location : doc_vishhnu

Proofread by : Aruna Narayanan

Latest update : March 26, 2024

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 26, 2024

*sanskritdocuments.org*

# શ્રીરઙ્ગનાથમઙ્ગલમ્

મઙ્ગલં રઙ્ગનાથાય મમ નાથાય મઙ્ગલમ્ ।
મઙ્ગલં લોકનાથાય લક્ષ્મીનાથાય મઙ્ગલમ્ ॥ ૧॥

લક્ષ્મીચરણલાક્ષાઙ્ગ સાક્ષિ શ્રીવત્સવક્ષસે ।
ક્ષેમઙ્કરાય સર્વેષાં શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૨॥

સૈકતે સહ્યકન્યાયાસ્તરઙ્ગાનિવ શીતલે ।
અતિરઙ્ગં ભુજઙ્ગેન્દ્રે સુખસુપ્તાય મઙ્ગલમ્ ॥ ૩॥

રજતાદ્રિનિષણ્ણેન્દ્રનીલશૈલાનુકારિણે ।
શેષે શયાય શ્યામાય શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૪॥

બાહુમેકં પ્રસાર્યાન્યં ઉપદાયાતિ પન્નગમ્ ।
નિદ્રાણાય જગદ્રક્ષાજાગરૂકાય મઙ્ગલમ્ ॥ ૫॥

પરિષ્કૃતાસનામ્ભોજપરસ્પરતલાઙ્ઘ્રયે ।
સ્ફુરત્પીતામ્બરાયાસ્તુ શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૬॥

દર્શિતાભયમુદ્રાય ભક્તાનાં તદ્વિરોધિનામ્ ।
દીપ્તદિવ્યાયુધાયાસ્તુ શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૭॥

સુસ્મિતાય સુનાસાય સુદૃશે સુન્દરભ્રુવે ।
સુલલાટકિરીટાય શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૮॥

તરઙ્ગિતદયૈર્વિશ્વં અપાઙ્ગૈરભિષિઞ્ચતે ।
સંરાજે સર્વલોકાનાં શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૯॥

ઇક્ષ્વાકોર્વિધિલબ્ધાય વિભીષણકૃતે પુનઃ ।
વિસ્રાણિતાય રામેણ શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૧૦॥

જ્ઞાનસિદ્ધાઞ્જનેનાસ્મદ્દેશિકૈર્દર્શિતાય મે ।
નિત્યે નિત્યપૂર્ણાય શ્રીરઙ્ગેશાય મઙ્ગલમ્ ॥ ૧૧॥

મઙ્ગલાશાસનપરૈર્મદાચાર્યપુરોગમૈઃ ।
સર્વૈશ્ચ પૂર્વૈરરાચાર્યૈઃ સત્કૃતાયાસ્તુ મઙ્ગલમ્ ॥ ૧૨॥

ઇતિ શ્રીરઙ્ગનાથમઙ્ગલં સમ્પૂર્ણમ્ ॥

Proofread by Aruna Narayanan

*Shri Ranganathamangalam*
pdf was typeset on March 26, 2024

Please send corrections to *sanskrit@cheerful.com*